No. १०६२ - घ

Title राजराजेश्वरी मानसीपूजापद्धतिः

Author श्री शंकराचार्य

Extent ५ Age

Subject भक्तिशास्त्रम् · सम्पूर्णम्

नं० १०६२-घ

राजराजेश्वरी मानसी पूजा पत्राणि ५

पत्राणि ५ (सम्पूर्णम् किन्तु जीर्णमस्ति)
(भक्तिशास्त्रम्)

नं० १०६२-घ

कर्त्ता श्री शङ्कराचार्यः

ॐ

श्री गणेशाय नमः॥ उषसि मागधमंगलगायनैर्झटिति जागृहि जागृहि जागृहि॥ अतिकृपार्द्रकटाक्षनिरी
क्षणैर्जगदिदं जगदंब सुखीकुरु॥१॥ कनकमयवितर्दिशोभमाने दिशि दिशि पूर्णसुवर्णकुंभयुक्ते
मणिमयमंडपमध्यमेहि मातर्मयि कृपयाशु समर्चनं ग्रहीतुं॥२॥ कनककलशशोभमानशीर्षं जल
धरलंबि समुल्लसत्पताकं॥ भगवति तव संनिवासहेतोर्मणिमयमंदिरमेतदर्पयामि॥३॥ तपनीयम
यी सुतूलिका कमनीया मृदुलोत्तरछदा॥ नवरत्नविभूषिता मया शिबिकेयं जगदंब तेर्पिता॥४॥ क
नकमयवितर्दिस्थापिते तूलिकाढ्ये विविधकुसुमकीर्णे कोटिबालार्कवर्णे॥ भगवति रमणीये रत्न
सिंहासनेस्मिन्नुपविश पदयुग्मं हेमपीठे निधेहि॥५॥ मणिमौक्तिकनिर्मितं महांतं कनकस्तंभचतु
ष्टयेन युक्तं॥ कमनीयतमं भवानि तुभ्यं नववितानमहं समर्पयामि॥६॥ दूर्वया सरसिजान्वि
तविष्णुक्रांतया च सहितं कुसुमाढ्यं॥ पद्मयुग्मसदृशे पदयुग्मे पाद्यमेतदुररीकुरु मातः॥७॥ गं
धपुष्पयवसर्षपदूर्वासंयुतं तिलकुशाक्षतमिश्रं॥ हेमपात्रनिहितं सहरत्नैरर्घ्यमेतदुररीकुरु मा
तः॥८॥ निहितं कनकस्य संपुटे पिहितं रत्नपिधानकेन यत्॥ तदिदं जगदंब तेर्पितं मधुपर्कं जननि
प्रगृह्यतां॥९॥ जलजद्युतिना करेण जातीफलकंकोललवंगगंधयुक्तैः॥ अमृतैरमृतैरिवातिशी

तैर्भगवत्याचमनं विधीयतां ॥१०॥ एतच्चंपकतैलमंब विविधैः पुष्पैर्मुहुर्वासितं न्यस्तं रत्नमये सुवर्णच
षके भृंगैर्भ्रमद्भिर्वृतं । सानंदं सुरसुंदरीभिरभितो हस्तैर्धृतं तन्मया केशेषु भ्रमरप्रभेषु सकलेष्वंगे
षु चालिप्यते ॥११॥ मातः कुंकुमपंकनिर्मितमिदं देहे तवोद्वर्तनं भक्त्याहं कलयामि हेमरजसा संमि
श्रितं केसरैः । केशानामलकैः विशोध्य विशदान् कस्तूरिकाञ्चितैः स्नानं ते नवकुंभरत्नसं
स्थितैः सुवासितैः मोदकैः ॥१२॥ दधिदुग्धघृतैः समाक्षिकैः सितया शर्करया समन्वितैः स्नपयामि ते
१२ वाहमादृतो जननि त्वां पुनरुष्णवारिभिः एलोशीर सुवासितैः सकुसुमैः गंगादितीर्थोदकैः
माणिक्यामृतमौक्तिकामृतयुतैः स्वच्छैः सुवर्णोदकैः मंत्रान्वैदिकतांत्रिकान् परिपठन् सानंद
मत्यादरात् स्नानं ते परिकल्पयामि जननि स्नेहात्त्वमंगीकुरु ॥१४॥ बालार्कद्युतिदाडिमीय
कुसुमप्रस्पर्द्धि सर्वोत्तमं मातस्त्वं परिधेहि दिव्यवसनं भक्त्या मया कल्पितं ॥ मुक्ताभिर्ग्रथितं
सुकंचुकमिदं स्वीकृत्य पीतप्रभं तप्तस्वर्णसमानवर्णमतुलं प्रावर्णमंगीकुरु ॥१५॥ नवरत्न
युते मयार्पिते कमनीये तपनीयपादुके ॥ सविलासमिदं पदद्वयं कृपया देवि तयोर्निधीयतां ॥१६॥

बहुभिरगरुधूपैः सादरं धूपयित्वा भगवति तव केशान् कंकतैर्मार्जयित्वा ॥ सुरभिभिररविंदैश्चं
पकैश्चार्चयित्वा झटिति कनकसूत्रैर्जूटमन्वेष्टयामि ॥१७॥ सौवीरांजनमिदं मंब चक्षुषोस्ते वि
न्यस्तं कनकशलाकया येत तू ॥ तन्नूनं मलिनमपि त्वदक्षिसंगाद्ब्रह्मेंद्राद्यभिलषणी
यतामियाय ॥१८॥ मंजीरे पदयोर्निधाय रुचिरे विन्यस्य कांचीं कटौ मुक्ताहारमुरो
जयोरनुपमां नक्षत्रमालां गले ॥ केयूराणि भुजेषु रत्नवलयश्रेणीं करेषु क्रमात्ता
टंके तव कर्णयोर्विनिदधे शीर्षे च चूडामणिं ॥१९॥ धम्मिल्ले तव देवि हेमकुसुमान्याधा
य भाले स्थले मुक्ताराजिविराजिहेमतिलकं नासापुटे मौक्तिकं ॥ मातर्मौक्तिकजालि
कां च पदयोः सर्वांगुलीषूर्मिकाः कण्ठे कांचनकिंकिणीर्विनिदधे शातावतंसं श्रु
तौ ॥२०॥ मातर्भालतले तवातिविमले काश्मीरकस्तूरिकाकर्पूरागरुभिः करोमि
तिलकं देहेंगरागं ततः ॥ वक्षोजादिषु यक्षकर्दमरसैः स्वीकृत्य पुष्पद्रवं पादौ कुंकु
मलेपनादिभिरहं संपूजयामि क्रमात् ॥२१॥ रत्नाक्षतैस्त्वां परिपूजयामि

मुक्ताफलैर्वा रुचिरारविंदैः ॥ अखंडितैर्देवि यवादिभिर्वा काश्मीरपंकांकिततंदुलैर्वा ॥
२२ ॥ जनानि चंपककैतलमिदं पुरो मृगमदोपमयं पटवासकः ॥ सुरभिगंधमिदं च चतुःस
मं सपदि सर्वमिदं परिगृह्यतां ॥ २३ ॥ सीमंतिनी भगवति मया सादरं न्यस्तमेतत् सिंदूरं मे हृ
दयकमले हर्षवर्षं तनोतु ॥ बालादित्यद्युतिरिव सदा लोहिता यस्य कांतिरंतर्ध्वांतं ह
रतु सकलं चेतसा चिंतयामि ॥ २४ ॥ मंदारकुंदकरवीरकदंबपुष्पैस्त्वां देवि संततमहं परि
पूजयामि ॥ जातीजपावकुलचंपककेतकादिनानाविधानि कुसुमानि मयार्पितानि ॥ २५ ॥
मालतीवकुलहेमपुष्पिकाकांचनारकरवीरकेतकैः ॥ कर्णिकारगिरिकर्णिकादिभिः पू
जयामि जगदंब ते वपुः ॥ २६ ॥ पारिजातशतपत्रपाटलैर्मल्लिकावकुलचंपकादिभिः ॥
अंबुजैः सुकुमुदैश्च सादरं पूजया० वपुः ॥ २७ ॥ लाक्षासंमिलितैः सिताभ्रसहितैः
श्रीवाससंमिश्रितैः कर्पूराकलितैः सितामधुयुतैर्गोसर्पिषालोडितैः ॥ श्रीखंडागरु
गुग्गुलुप्रभृतिभिर्नानाविधैर्वस्तुभिर्धूपं ते परिकल्पयामि जननि स्नेहात्त्वमंगीकुरु ॥ २८ ॥

रत्नालंकृतहेमपात्रनिहितैर्गोसर्पिषा दीपितैर्दीपैर्दीर्घतरांधकारभिदुरैर्बालार्ककोटिप्रभैः ॥
आताम्रज्वलदुज्ज्वलज्वलनवद्रत्नस्थदीपैः सदा मातस्त्वामहमादरादनुदिनं नीराजयाम्युच्चकैः ॥२९॥
महान्ति कनकपात्रे स्थापयित्वा विशालान्डमरुसदृशरूपान्पूपकान्गोधूमदीपान् ॥ बहुघृतम
थ तेषु न्यस्तदीपान्कपालून्भुवनजननि कुर्वे नित्यमारार्तिकं ते ॥३०॥ सविनयमथ दत्त्वा जानु
युग्मं धरित्र्यां सपदि शिरसि धृत्वा पात्रमारार्तिकस्य ॥ मुखकमलसमीपे ते त्रिसार्धं त्रिवारं भ्र
मयति मयि भूयात्ते कृपार्द्रः कटाक्षः ॥३१॥ मातस्त्वां दधिदुग्धपायसमहाशाल्यन्नसंतानिकैः सू
पापूपसिताघृतैः सवटकैः सक्षौद्ररंभाफलैः ॥ एलाजीरकहिंगुनागरनिशाकौस्तुंबरैः संस
स्कृतैः शाकैः साकमहं सुधाधिकरसैः संतर्पयाम्यर्चिभिः ॥३२॥ सापूपसूपदधिदुग्ध
सिताघृतानि सुस्वादुभक्ष्यपरमान्नपुरःसराणि ॥ शाकोल्लसन्मरिचजीरकबाह्लिकानि
भक्ष्याणि भुंक्ष्व जगदंब मयार्पितानि ॥३३॥ क्षीरमेतदिदमुत्तमोत्तमं प्राज्यमाज्यमिदमुज्ज्व
लं मधु ॥ मातरेतदमृतोपमं त्वया संभ्रमेण परिपीयतां मुहुः ॥३४॥ उष्णोदकैः पाणियुगं

3

सुरवं च प्रसाल्यमातः कलधौतपात्रे ॥ कर्पूरमिश्रेणसकुंकुमेन हस्तौ समुद्धृतपचंदनेन ॥३५॥
ग्रंथिं श्रीतनुश्रीनवासितं तव पानाय मया निवेदितं ॥ पटपूतमिदं जितामृतं शुचिगंगाम्बु तमंव
पीयतां ॥३६॥ ताम्राम्ररंभाफलसंयुतानि द्राक्षाफलाक्षोडसमन्वितानि ॥ सनारिकेलानि स
दाडिमानि फलानि ते देवि समर्पयामि ॥३७॥ कूष्मांडकोशादिकसंयुतानि जंबीरनारिंगसम
न्वितानि ॥ सुबीजपूराणि सजांबवानि फलानि [illegible]ते ॥३८॥ कर्पूरपूर्णयुतैर्लवंगसहितैः क
कोलचूर्णान्वितैः सुस्वादुक्रमुकैः सुगौरखदिरैः सुस्निग्धजातीफलैः ॥ मातः केतकिपत्र
पांडुरुचिभिस्तांबूलवल्लीदलैः सानंदं मुखमंडनार्थमतुलं तांबूलमंगीकुरु ॥४०॥
एलालवंगादिसमन्वितानि कंकोलकर्पूरसमिश्रितानि ॥ तांबूलवल्लीदलसंयुतानि
पूगानि ते देवि समर्पितानि ॥४१॥ तांबूलवल्लिदलनिर्जितहेमवर्णं स्वर्णौक्तिकं पूगिफल
मौक्तिकचूर्णयुक्तं ॥ रत्नस्थगित्थितमिदं रविभिरणसार्धं तांबूलमंब वदनाम्बुरुहे गृहा
ण ॥४२॥ प्रथवबहुमणि [illegible] मौक्तिकै [illegible] वनकमनीयैः पूजयित्वा स

वस्त्रैः॥ मिलित विविध मुक्तादिव्य माणिक्ययुक्तो जननि कनक वद्धिं दलिणां तेर्पयामि॥४२॥
मातः कांचन दंडमंडित मिदं पूर्णेंदु बिंबप्रभं नानारत्न विशोभि हेम कलशं लोकत्रया ह्लादकं॥
भास्वन्मोक्तिक जालिकापरिवृतं प्रीत्या स्वहस्ते धृतं छत्रं ते परिकल्पयामि शिरसि त्वष्ट्रा स्वयं नि
र्मितं॥४३॥ शारदिंदुमरीचि गौर वर्ण मणिमुक्ता विलसत्सुवर्ण दंडं॥ जगदंब विचित्र चामरं त्वा
म हमानंदभरेण वीजयामि॥४४॥ मार्तंड मंडल निभो जगदंब यो यं भक्त्या मया मणिमयो
मुकुरोर्पितस्ते॥ पूर्णेंदु बिंब रुचिरं वदनं स्वकीयमस्मिन्विलोकय विलोल विलोचने त्वं॥४५॥
इंद्रादयो नतिनतैर्मुकुट प्रदीपैर्नीराजयंति सततं तव पादपीठं॥ तस्मादहं तव शरीरमिदं
समस्तं नीराजयामि जगदंब सहस्रदीपैः॥४६॥ प्रियगतिरतितुंगो रत्नपल्याणयुक्तः
कनकमयविभूषः स्निग्धगंभीरघोषः॥ जगवति कलितो यं वाहनार्थं मया ते तुरगशत
समेतो वायुवेगस्तुरंगः॥४७॥ द्रुततर तुरगैर्विराजमानं मणिमय चक्र चतुष्टयेन युक्तं॥
कनकमयमहाविताना वंतं भगवति ते हि रथं समर्पयामि॥४८॥ मधुकरवृत कुंभन्यस्त
सिंदूररेणुः कनक कलित घंटाकिंकिणी शोभि कंठः॥ श्रवणयुगलचंचच्चामरो मेघ

तुल्यो जननि तवमुदेस्तांमत्तमातंगपाषः ॥४९॥ हयगजरथपत्तिशोभमानंदिशिदिशिदुंदु
भिवेघनादयुक्तं ॥ प्रतिबहुचतुरंगसैन्यमेतद्भगवतिभक्तिभरेणतेर्पयामि ॥५०॥ पं
क्तीकृतसप्तसागरं बहुसंपत्सहितं मयांबते ॥ विपुलं धरिणितलाभिधं प्रबलं दुर्गमिदं सम
र्पितं ॥५१॥ आतपत्रयुतैः स्वभावशीतैरतिसौरभ्ययुतैः परागपीतैः ॥ [illegible] चमरैर्मुखवीकृतैरनंतैर्व्यजनै
स्त्वां जगदंब वीजयामि ॥५२॥ भ्रमविलुलितकुंतलाननांगी विगलितमाल्यविकीर्णरंगभूमिः ॥ इयमति
रुचिराननानटंती नवहृदयेमुदमातनोतुमातः ॥५३॥ मुखनयनविलासलोलवेण्याविसेननिर्जितमत्त
लोलभृंगाः ॥ युवजनसुखकारिचारुलीला भगवति तेपुरतोनटंति बालाः ॥५४॥ रुचिरकुचतटीनाना
द्युकालेनटीनां प्रतिग्रहमथंतत्र प्रत्यहं प्रादुरासीत् ॥ धिमिकिटिधिमिधिधिधिधिधिधिधिधिधि [illegible] धिमिति
धिगितित्तत्तत्तथेथी तिशब्दैः ॥५५॥ भ्रमदलिकुलतुल्यालोलधम्मिल्लभारास्मितमुखकमलोत्याद्वि
व्यलावण्यपूराः ॥ अनुपमतमवेषाबारयोषा नटंतिपरभृतकलकंठीदेविहर्षंतनोतु ॥५६॥ डमरुडिंडिम
झर्झरझल्लरीमृडुमृदंगघटीपटहादयः ॥ झटितिझंकृतिजिर्जगदंबिके बहुरवोसुखयंतुते ॥५७॥
विपंचीषुसप्तस्वरान्वादयंत्यस्तवद्वारिगायंतिगंधर्वकन्याः ॥ [illegible] सावधानेनचित्तेनमातः

समाकर्णयित्वं नयाप्रार्थितासि ॥५८॥ पुष्पि नवकमनीयैर्नर्तनैर्नर्तकीनां क्षणमिति रमयित्वा चैन सवत्त
दीयं ॥ ५० ॥ स्वयमपि तु विचित्रैर्नृत्यवादित्रगीतैर्भगवति भवदीयं मानसं रंजयामि ॥५९॥ तव देवि गुण
नुवर्णने चतुराननो चतुराननादयः ॥ तदिहैकमुखेषु जंतुषु स्तवनं कस्तव कर्तुमीश्वरः ॥६०॥ पदे पदे याप
रिपूजकेभ्यः सद्योश्वमेधादि फलं ददाति ॥ तां सर्वपापक्षयहेतुभूतां प्रदक्षिणं ते परितः करोमि ॥६१॥ रक्तोत्प
लारक्तलतप्रभाभ्यां ध्वजोर्ध्वरेखाकुलिशांकिताभ्यां ॥ प्रशेषवृंदारकवंदिताभ्यां नमो भवानी पदपंकजा
भ्यां ॥६२॥ चरणनलिनयुग्मं चंपकैरर्चयित्वा कनककमलमालां कंठदेशेर्पयित्वा ॥ शिरसि विनिहितोयं रत्न
पुष्पांजलिस्ते हृदयकमलमध्ये देवि [illegible]षं तनोतु ॥६३॥ प्रथमणिमयमंचकाभिरामे द्युतिमतिपुष्पविता
नराजमाने ॥ प्रसरदगरुधूपधूपितेस्मिन् भगवति वासगृहेस्तु ते निवासः ॥६४॥ प्रथमातरुशीतवासितं
निजतांबूलरसेन रंजितं ॥ तपनीयमये हि पात्रके मुखगंडूषजलं निधीयतां ॥६५॥ एतस्मिन्मणि खचि
ते सुवर्णपीठे त्रैलोक्याभ ॥ पवरदौनिध्याय पादौ ॥ विस्तीर्णे मृदुलतरोत्तर ॥ छदेस्मिन् पर्यंके
कनकमये निषीद मातः ॥६६॥ तव देवि सरोजचिन्हयोः पदयोर्निर्जितपद्मरागयोः ॥ अतिरक्त

तैलैरलक्तकैः पुनरलक्तं रचयामि रक्तं ॥७६॥ कृतनमपदयुगं व मंचके सिमिन्दरस्य कुलतरं ।
तूलिकया विराजमाने ॥ अतिरहसि मुदा सिंचेन साध्यैरस्त्वशांतने कोस्माहहि दिव्यं रंमती ॥
॥७७॥ मुक्ताकुंदेंदुगौरां मणिमयमकुटां रत्नताटंकयुक्तामक्षस्रक्पुष्पहस्तामभय॥
वरकरां चंद्रचूडां त्रिनेत्रां ॥ नानालंकारयुक्तां सुरमकुटमणिद्योतितस्वर्णपीठां सानंदां
सुप्रसन्नां त्रिभुवनजननीं चेतसा चिंतयामि ॥७९॥ एषा भक्त्या तव विरचिता या मया देवि पूजा
स्वीकृत्यैनां सपदि सकलान्मे पराधान्क्षमस्व ॥ न्यूनं यत्तत्तव करुणया पूर्णतामेतु सद्यः सा
नंदं मे हृदयकमले ते स्तु नित्यं निवासः ॥८०॥ पूजामिमां यः पठति प्रभाते मध्याह्नकाले
यदि वा प्रदोषे ॥ धर्मार्थकामान्पुरुषो लभेत देहावसाने शिवतामुपैति ॥८१॥ पूजामिमां
पठेन्नित्यं पूजां कर्तुमनीश्वरः ॥ पूजाफलमवाप्नोति वांछितार्थं च विंदति ॥८२॥
प्रत्यहं भक्तिसंयुक्तो यः पूजनमिदं पठेत् ॥ वाग्वादिन्याः प्रसादेन वत्सरात्स कवि
र्भवेत् ॥८३॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छंकराचार्यविरचित